वाजपेयादिभिर्यष्टे” इति एततृपदस्रपसंहरति मनुः “एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः। स्वामिनाञ्च पशूनाञ्च पालानाञ्च व्यतिक्रमे”।

**स्वायम्भुव** पु॰ स्वयम्भुवोऽपत्यम्, तस्येदम् वा अण् ओरो-टिति वक्तव्ये ओर्गुण इत्युक्त्या संज्ञापूर्वकविधेरनित्य-त्वज्ञापनान्न गुणः अवङ्। १स्वयम्भूपुत्रे मनौ २स्वयम्भू-सम्बन्धिनि त्रि॰ “धाम स्वायम्भुवं ययुः” कुमारः। स्त्रियां ङीप्। सा च ३ब्राह्म्याम्। “भार्गवी नार-दीया च वार्हस्पत्याङ्गिरस्यपि। स्वायम्भुवस्य शास्त्रस्य चतस्रः संहिता मताः” इति तदुक्तधर्मशास्त्रसंहिता-चतुष्टयम्। तदुत्पत्त्यादिकं यथा

“ततः कालेन महता तस्याः पुत्रोऽभवन् मनुः। स्वाय-म्भुव इति ख्यातः स विराडिति नः श्रुतम्। तद्रूपगुण-सामान्यादधिपूरुष उच्यते। वैराजा यत्र ते जाता बहवः शंसितव्रताः। स्वायम्भुवाद् महाभागाः सप्त सप्त तथापरे। स्वारोचिषाद्या ते सर्वे ब्रह्मतुल्यस्वरूपिणः। औत्तमिप्रमुखास्तद्वद् येषान्त्वं सप्तमोऽधुना” मत्स्यपु॰ ४अ॰। “ऋषींस्तेषां प्रवक्ष्यामि पुत्रान् देवगणांस्तथा। मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः। पुलस्त्यश्च वशि-ष्ठश्च सप्तैते ब्रह्मणः सुताः। उत्तरस्यां दिशि तथा राजन्! सप्तर्षयः स्थिताः। यामा नाम तथा देवास्त्वासन् स्वायम्भुवेऽन्तरे। आग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथि-र्वसुः। ज्योतिष्मान् द्युतिमान् हव्यः सवनः पुत्र एव च मनोः स्वायम्भुवस्यैते दश पुत्रा महौजसः। एतत्ते प्रथमं राजन्! मन्वन्तरमुदाहृतम्” हरिवं॰७अ॰।

**स्वाराज्** पु॰ स्वः स्वर्गं राजते राज-क्विप्। इन्द्रे अमरः।

**स्वाराज्य** न॰स्वराजः भावः ष्यञ्। ब्रह्मत्वे स्वाराज्यसिद्धिः।

**स्वारोचिष** पु॰ द्वितीये मनौ। “ऊर्वो वशिष्ठपुत्रश्च स्तम्बः काश्यप एव च। प्राणो वृहस्पतिश्चैव दत्तो निश्च्यवन-स्तथा। एते महर्षयस्तात! वायुप्रोक्ता महाव्रताः। देवाश्च तुषिता नाम स्मृताः स्वारोचिषेऽन्तरे। हविघ्नः सुकृतिर्ज्योतिरापो मूर्त्तिरयस्मयः। प्रथितश्च नभस्यश्च नभ ऊर्जस्तथैव च। स्वारोचिषस्य पुत्रास्ते मनोस्तात महात्मनः। कीर्त्तिताः पृथिवीपाल! महावीर्यपराक्रमाः। द्वितीयमेतं कथितं तव मन्वन्तरं मया” हरिवं॰७अ॰।

**स्वार्थ** पु॰ स्वस्य अर्थः प्रयोजनम् अभिधेयो वा। १स्वप्रयो-जने २स्वाभिधेये च “स्वार्थकः स्वार्थबोधकर्द्दिति” शब्दश॰

**स्वार्थिक** त्रि॰ स्वार्थे विहितः ठण्। स्वार्थविहिते व्याकर-णोक्ते प्रत्यये। “स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवच-नान्यनुवर्त्तन्ते” महाभाष्यं यथा बहुगुडो द्राक्षा “क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते” महाभाष्यम्। देवता अपकष्टगुरुका गुरुडोर इत्यादि।

**स्वास्थ्य** न॰स्वस्थस्य भावः ष्यञ्। १आरोग्ये २सन्तोषे अमरः।

**स्वाहा** अव्य॰ सु+आ+ह्वे-डा। १देवोद्देशेन हविस्त्यागे अमरः। २अग्निभार्यायां स्त्री “स्वाहयेव हविर्भुजम्” रघुः। ३मातृकाभेदे च स्त्री “नमः स्वधायै स्वाहायै”इति पितृगाथा। “प्रकृतेः कलया चैव सर्वशक्तिस्वरूपिणी। बभूव दाहिका शक्तिरग्नेः स्वाहा स्वकामिनी। ईषद्-मध्याह्नसमार्त्तरुद्रप्रभाच्छादनकारिणी। त्वमग्नेर्दाहिका शक्तिर्भवपत्नी च सुन्दरी। दग्धुं न प्रभुरत्यहते हुताशश्च त्वया विना। त्वन्नामोच्चार्य्य मन्त्रान्ते यो दास्यति हविर्नरः। सुरेभ्यस्तत्प्राप्नुवन्ति सुराः स्वानन्द-पूर्वकम्। अग्नेः सम्पत्स्वरूपा च श्रीरूपा सा गृहे-श्वरी। देवानां पूजिता शश्वत् नरादीनां भवाब्धिके!” ब्रह्मवै॰ प्र॰ ३७अ॰। ४दुर्गाशक्तिभेदे “दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते” दुर्गापूजामन्त्रः।

**स्वाहाप्रिय** पु॰ ६त॰। अग्नौ हला॰स्वाहापत्यादयोऽप्यत्र।

**स्वाहाभुज्** पु॰स्वाहेतिमन्त्रेण त्यक्तद्रव्यं भुङ्क्ते भुज-क्विप्। देवे अमरः। [च मेदि॰

**स्विद्** अव्य॰ स्विद्-क्विप्। १प्रश्ने २वितर्के अमरः ३पादपूरणे

**स्विन्न** त्रि॰ स्विद्-क्त। १घर्मयुक्ते २स्वेदान्विते च ३पक्वे “स्विन्नमन्नमुदाहृतम्” स्मृतिः। [अङ्गीकारे।

**स्वीकार** पु॰ अस्वस्य स्वस्य कारः करणं स्व+च्वि+कृ-घञ्।

**स्वीय** त्रि॰ स्वस्येदम् छ अपाणिनीयैरत्र न कुगिति मन्यते। १निजसम्बन्धिनि २नायिकाभेदे स्त्री नायिकाशब्दे दृश्यम्। [आदित् स्वूर्णं स्वूर्च्छितम्।

**स्वुर्च्छ** विस्मृतौ भ्वा॰ प॰ सक॰ सेट्। स्वूर्च्छति अस्वूर्च्छीत्

**स्वृ** शब्दे अक॰ उपतापे सक॰ भ्वा॰ प॰ वेट्। स्वरति अस्वा-रीत् अस्वार्षीत्।

**स्वृ** हिंसने क्र्या॰ प॰प॰सक॰सेट्। स्वृणाति अस्वारीत्।

**स्वृक** गतौ भ्वादि॰ आत्म॰सक॰सेट् ऋदित् चङि न ह्रस्वः। स्वेकते अस्वेकिष्ट।

**स्वेच्छा** स्त्री ६त॰। स्वाभिलाषे हेमच॰। [धीनस्वत्ययुक्ते त्रि॰।

**स्वेच्छामृत्यु** पु॰स्वेच्छया मृत्युर्यस्य। १भीष्मे त्रिका॰ २स्वेच्छा-

**स्वेद** पु॰ स्विद्- भावे घञ्। १पाकभेदे (सेका) २घर्मे गात्रादितो जलादेः निस्यन्दने। स्विद् भावे अच्।